MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

# The Universal Message of Sanskrit Narrative Literature: A Critical Study

## संस्कृतकथासाहित्यस्य वैश्विकसन्देशः — एकम् अनुशीलनम्

***Sujata Mondal***
*Research Scholar*
*Central Sanskrit University, New Delhi, India.*
*Email: mondalsuji@gmail.com*
*Page No: 99-104*

***Abstract:*** *Sanskrit narrative literature serves as a rich reservoir of guiding values for human life, imparting wisdom on ethics, righteous conduct, and practical morality through seminal works such as the Panchatantra and Hitopadesha. This research paper presents a comprehensive study on the contemporary relevance of the universal messages embedded within Sanskrit story literature. In today's global climate marked by war, violence, and discord, timeless principles such as 'Vasudhaiva Kutumbakam' (the world is one family), universal brotherhood, and non-violence have become paramount for global peace.*

*Furthermore, this paper substantiates core themes including the true essence of Dharma, the perilous consequences of greed, the indispensability of self-effort (Udyoga), the power of unity, genuine friendship, noble companionship (Satsangati), and prudent action. Rooted in eternal values, these profound messages serve as a guiding beacon—like a life-affirming elixir (Sanjeevani)—for resolving modern global crises, fostering a values-driven society, and promoting the holistic development of humankind.*

***Keywords:*** *Sanskrit Narrative Literature, Panchatantra, Hitopadesha, Moral Conduct (Sadachara), Power of Unity.*

वर्तमाने युद्धकलहविरोधविद्वेषसदृशरुग्णवातावरणे सुखशान्तिसमृद्धयः न दृश्यन्ते। फलतः यत्र मानवता क्रन्दति, तत्रैव दानवता विहसति। अस्मिन् सन्दर्भे प्रेम्णः संवर्धनाय जागरणाय च विश्वबन्धुत्वम् अपेक्षितं वर्तते। एकस्यैव परमपितुः परमेश्वरस्य सन्ततित्वात् विश्वस्य जनेषु परस्परं बन्धुप्रीतिः भवति। वेदोक्तविश्वबन्धुत्वसदृशोदात्तभावस्य हितोपदेशे प्रत्यक्षः प्रभावः परिलक्ष्यते। यतः 'दुर्बुद्धिः' नाम श्रृगालः 'सुबुद्धि'नामककाकं कथयति। यथा —

"अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्" ॥[1]

उपर्युक्ते पद्ये विश्वकल्याणस्य समरसतायाश्च भावना समाहिता वर्तते, या वैश्विकसमाजं संयोजयति। जीवने पूर्णरूपेण सर्वविधायाः हिंसायाः परित्यागः एव अहिंसा अस्ति, यस्यां मनसः वाचः कर्मणश्च सकारात्मकता विद्यमाना भवति। इयं सामाजिकसद्भावपुरःसरं विश्वप्रेम जनयति। वैरितादूरीकरणाय अस्या उपयोगिता अस्ति। जीवने भारतीयैः ऋषिमुनिभिः महापुरुषैश्च अस्याः पालनं कृतम्। संस्कृतसाहित्ये अस्या विशदतया चर्चा कृता। वेदव्यासेन इयं 'दैवीसम्पद्' मता। [2]श्रीनारायणपण्डितेन हितोपदेशस्य 'मित्रलाभ'नामके प्रथमप्रकरणे 'जरद्गवमार्जार' कथायां 'दीर्घकर्ण'नामकस्य मार्जारस्य मुखात् अस्याः महत्त्वविषये श्रावितम्। यथा —

"अहिंसा परमो धर्मस्तथाऽहिंसा परो दमः।
अहिंसा परमं दानमहिंसा परमं तपः।।
अहिंसा परमो यागस्त्वहिंसा परमं बलम्
अहिंसा परमं मित्रमहिंसा परमं श्रुतम्।।
सर्वहिंसानिवृत्ता ये नराः सर्वसहायाश्च ये।

सर्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः"।।[3]

हितोपदेशस्य पञ्चतन्त्रस्य च धर्मचर्चा वैश्विकसमाजाय धर्माचरणस्य अर्थात् सदाचारस्य सन्देशं ददाति। हितोपदेशकारस्यानुसारम् — प्राणिषु दया एव धर्मः अस्ति, धर्महीनस्य मानवस्य जीवनम् अजायाः (छाग्याः) कण्ठस्तनवत् निरर्थकं वर्तते। हितोपदेशकारेण धर्मस्य प्रशंसा क्रियते इत्थम्- आहारः, निद्रा, भयं मैथुनं च एतानि चत्वारि तु मनुष्याणां पशूनां च समानानि एव सन्ति; मनुष्येषु केवलं धर्मः (गुणः) एव अधिकः अस्ति। अतः, धर्महीना (विद्याविनयादिगुणरहिताः) मनुष्याः पशुभिः समानाः एव भवन्ति।[4] वृद्धव्याघ्रेण पथिकः प्रबोधितः यत्, धर्मस्य अष्टौ मार्गाः सन्ति (यज्ञकरणम्, अध्ययनम्, दानम्, तपः, सत्यवचनम्, धैर्यम्, क्षमा, निर्लोभता च)[5]। चीत्कारिगर्दभकथायां श्वा (कुकुरः) गर्दभं कथयति यत्, धर्मसेवनं स्वयमेव करणीयं भवति, अन्येषां कृते न त्यज्यते। पुण्यतीर्थेषु कठिनतपस्यां कुर्वतः जनस्य एव पुत्रः धार्मिकः भवति।[6] व्यक्तेः मृत्योः पश्चात् तस्य सर्वं धनं (सम्पत्तिः) विनश्यति, केवलं धर्मः एव तादृशं मित्रम् अस्ति, यत् मृत्योः अनन्तरम् अपि तस्य सहचरं भवति।[7] श्रीविष्णुशर्मणा कथितम् — 'अहिंसा एव धर्मस्य मार्गः अस्ति।' अस्मिन् असारे संसारे धर्म एव मानवस्य एकमात्रं गतिः अस्ति, यतः, अयमेव तस्य रक्षकः भवति। अस्मिन् सन्दर्भे मनोः कथनम् अत्यन्तमेव यथार्थं वर्तते, येनोक्तम् — 'धर्मो रक्षति रक्षितः'[8] इति।

शशकपिञ्जलकथायाम् एकः वनमार्जारः स्वस्य धर्मोपदेशे कथयति यत् — धर्मरहितं पाण्डित्यं व्यर्थं भवति, ये धर्मपरायणा न सन्ति, ते क्षुद्रा नगण्याश्च भवन्ति, तथा च धर्मकार्यस्य सम्पादनं शीघ्रं करणीयम्। सः संक्षेपेण — 'परोपकारः पुण्याय, पापाय परपीडनम्'[9] तथा 'आत्मनः प्रतिकूलानि परेषां न समाचरेत्'[10] -इत्येतत् धर्मस्य सारं कथयति। अतः सदाचारपुण्यकर्मयुक्तः धर्मः वैश्विकसमाजस्य कल्याणाय आचरणीयः वर्तते। लोभ एकप्रकारकः मनोविकारः अस्ति, येन किञ्चिद् वस्तु प्रति अतिशयिता आसक्तिः भवति। शास्त्रेषु अस्य भृशं निन्दा कृता। लुब्धो जनः समाजे निन्दायाः पात्रं भवति तथा च विपद्भिः आवृतः तिष्ठति। गीताकारेण काम-क्रोधयोः अनन्तरम् अयमेव नरकस्य तृतीयः मार्गः कथितः। लोभिनः मनुष्यस्य विषये केनापि सत्यमेव कथितम्। यथा —

"सुमहान्त्यपि शास्त्राणि धारयन्तो बहुश्रुताः।
छेत्तारः संशयानाञ्च क्लिश्यन्ते लोभमोहिताः"।।[11]

लोभः अनर्थानां मूलम् अस्ति। यथा —

"लोभात् क्रोधः प्रभवति, लोभात् कामः प्रजायते।
लोभान्मोहश्च नाशश्च, लोभः पापस्य कारणम्"॥[12]

कपोतराजः चित्रग्रीवः व्याधेन तण्डुलकणान् विकीर्य विस्तारिते जाले लोभवशात् निपतनायोद्यतान् कपोतान् एतस्मादेव कारणात् कस्यचित् पथिकस्य दशामधिकृत्य कथितवान्। यथा —

"कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे।
वृद्धव्याघ्रेण सम्प्राप्तः पथिकः स मृतो यथा"॥[13]

समाजे अद्यापि वृद्धव्याघ्रसदृशानां शोषकाणां वञ्चकानां च चरित्रं विद्यमानम् अस्ति, ये स्वप्रयोजनसिद्धये लुब्धं जनं स्वकीयलोभजाले आबद्धं कुर्वन्ति। अन्ततः कपोताः तण्डुलकणानां लोभात् जाले बद्धाः सन्तः पश्चात्तापं कुर्वन्ति। लुब्धस्य ब्राह्मणस्य लोभकारणात् तस्य पत्न्या ब्राह्मण्या पालितः नकुलः हन्यते। अस्मिन् प्रसङ्गे कस्यचित् कथनं समीचीनं वर्तते। यथा —

"अतिलोभो न कर्तव्यो, लब्धं नैव परित्यजेत्।
अतिलोभाऽभिभूतस्य चक्रं भ्रमति मस्तके"॥[14]

मानवस्य सर्वविधाभ्युदयाय कृतं कर्म 'उद्योगः' कथ्यते, यस्य पर्यायाः शब्दाः सन्ति — उद्यमः, पुरुषार्थः, अध्यवसायः, प्रयत्नश्च। मानवः अनेन स्वकीयाः सर्वाः मनोकामनाः पूरयितुं शक्नोति। नीतिशास्त्रे पुरुषस्य षड्सु शक्तिषु उद्योगस्य प्राथमिकता वर्तते। समाजे अलसः पुरुषः एव दैवे विश्वसिति। संसारे उद्यमी जनः एव जीवनस्य वास्तविकं सुखं सम्प्राप्य नीरोगः तिष्ठति।

भर्तृहरिणा आलस्यं मनुष्यस्य महान् शत्रुरिति प्रतिपाद्य उद्यमस्य प्रशंसा कृता। यथा —

"आलस्य हि मनुष्याणां शरीरस्थोमहान रिपुः।
नास्त्युद्यमसमोबन्धुः कुर्वाणो नावसीदति"।।[15]

हितोपदेशकारेणापि उद्योगविषये उक्तम्।

"न दैवमिति सञ्चिन्त्य त्यजेदुद्योगमात्मनः।
अनुद्योगेन तैलानि तिलेभ्य नाप्तुमर्हति"[16]

पञ्चतन्त्रकारेण उद्यमस्य महत्त्वं प्रतिपादितम्। यथा

"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवं हि दैवमिति कापुरुषा वदन्ति"[17]

"उद्यमेन हि सिद्ध्यन्ति कार्याणि, न मनोरथैः।
न हि सिंहस्य सुप्तस्य प्रविशन्ति मुखे मृगाः॥
उद्यमेन विना राजन्न सिद्ध्यन्ति मनोरथाः।
कातरा इति जल्पति यद्भाव्य तत् भविष्यति"।।[18]

अतः अत्रायं सन्देशः प्रदत्तो यत्, मानवः अनेनैव आत्मनः समाजस्य च समुन्नतिं विधाय प्रशंसायाः पात्रं भवितुं शक्नोति। अस्यैव बलेन राजनेतृभिः देशभक्तानां सहयोगात् देशः स्वतन्त्रः कारितः। संस्कृतकथासाहित्ये मैत्रीविषयिणी पर्याप्ता विवेचना वर्तते, यत्र अस्याः गुणानां दोषाणां च उद्घाटनं कृतम् अस्ति। पञ्चतन्त्रे 'मन्थरक'नाम्ना कच्छपेन मूषकः कथितः यत् अयं काकः तव सत्यं मित्रम् अस्ति, यतः क्षुधया पीडितो भूत्वाऽपि अनेन त्वं न भक्षितः। अत्र सः सत्यप्रेम्णः लक्षणानाम् उल्लेखं कृतवान्। यथा —

"विकारं याति नो चित्तं वित्ते यस्य कदाचन।
मित्रं न्यात्सर्वकाले च, कार्येन्मित्रमुत्तमम्"॥[19]

"विदद्भिः सुहृदमित्र चिह्न रैतैरसंशयम्।
परीक्षाकारणं प्रोक्तं होमाग्नेरिव पण्डितैः"।।[20]

पञ्चतन्त्रकारेण आपत्काले सहायभूतं मित्रमेव सत्यं मित्रं मतम्, यतो हि अनुकूलायां परिस्थितौ अर्थात् सम्पत्तिकाले तु दुर्जनोऽपि मित्रं भवति।[21] सत्यमित्रस्य प्रशंसा हितोपदेशकारेणापि कृता वर्तते। तन्मते सत्यमित्रस्य गुणाः सन्ति — चित्तशुद्धिः, त्यागः, शौर्यम् (वीरता), सुख-दुःखयोः समभावः, औदार्यम् (उदारता), प्रेम, सत्यञ्च।[22] संस्कृतस्य कथाकारैः छल-कपट-स्वार्थ-अभिमानयुक्तस्य मित्रस्य परित्यागाय तथा च विश्वस्तं, सरलहृदयं, निःस्वार्थं, दर्परहितञ्च जनं मित्रं विधातुं परामर्शः दत्तः। सङ्घटने शक्तिः निहिता अस्ति, यस्य शास्त्रेषु लोके च बहवः दृष्टान्ताः प्राप्यन्ते। सर्वप्रथमम् अस्य चर्चा ऋग्वेदस्य दशमे मण्डले अभवत्। कपोतराजः चित्रग्रीवः व्याधस्य जाले पतितान् कपोतान् तज्जालं गृहीत्वा आकाशे उत्पतनार्थम् अकथयत्, यतो हि — लघूनि (क्षुद्राः) वस्तूनि अपि परस्परं मिलित्वा कार्यसाधकानि भवन्ति। पश्य — तृणानि अपि यदा एकत्रितानि भूत्वा रज्जुभावम् आपद्यन्ते (रज्जुः भवन्ति), तदा तैः महाहस्तिनः अपि बध्यन्ते। स्वकुलस्य लघुजनानामपि सङ्गतिः श्रेयस्करी भवति। पश्य — तण्डुलाः अपि स्वतुषैः (कणेभ्यः) पृथग्भूताः सन्तः अङ्कुरिताः न भवन्ति। अस्मिन् सन्दर्भे निम्नोक्तः श्लोकोऽपि अवलोकनीयः वर्तते। यथा —

"अथ ये संहता वृक्षाः सर्वतः सुप्रतिष्ठिताः।
न ते शीघ्रेण वातेन हन्यन्ते ह्योकसंश्रयात्"।।[23]

एकतायाः अभावे एकोदरस्य, किन्तु द्विमुखस्य भारुण्डपक्षिणः विनाशः भवति, यस्य विषये सुवर्णसिद्धिना कथितम्। यथा-

"एकोदराः पृथग्ग्रीवा अन्योन्यफलभक्षिणः।
असंहता विनश्यन्ति, भारुण्डा इव पक्षिणः"॥[24]

उपर्युक्तोदाहरणानां माध्यमेन समाजस्य जनेभ्यः परस्परं सङ्घटिताः भूत्वा निवसितुं शिक्षा प्रदत्ता। अत एवोक्तम् — 'सङ्घे शक्तिः कलौ युगे'। भारतीय-सामाजिक-सांस्कृतिक-परिप्रेक्ष्ये दानस्य महिमा वर्णिता अस्ति। दानेन मानवे त्यागभावना विकसिता भवति। उदारचेतोभिः जनैः दानस्य दृष्टान्तः स्थापितः। दरिद्रेभ्यः दानप्रदानम् एव अस्य सार्थकता वर्तते।[25] सात्त्विकदानस्य विषये हितोपदेशकारेण कथितम्। यथा —

"दातव्यमिति यद्दानं दीयतेऽनुपकारिणि।
देशे काले च पात्रे च तद्दानं सात्त्विकं विदुः" ॥[26]

कृपणस्य धनं कस्यापि कार्ये न उपयुज्यते, किन्तु तत् धनम् अग्नौ भस्मीभवति। तस्य चौर्यं भवति। नृपेण ह्रियते। धनस्य तिस्रः गतयः सन्ति — दानं, भोगः, नाशश्च। कृपणस्य धनस्य तृतीया गतिः भवति। प्रियवचनसहितस्य दानस्य दुर्लभता अस्ति। अत्र दानशीलतायाः सन्देशः प्रसारितः। दया एकप्रकारकः मानवीयगुणः अस्ति, यस्य विषये वृद्धव्याघ्रः लुब्धं ब्राह्मणं कथयति। यथा

"प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा।
आत्मौपम्येन भुतानां दयां कुर्वन्ति साधवः"।।[27]

दयालोः पुरुषस्य प्रशंसा सर्वत्र भवति, यतो हि सः सर्वेषां जन्तूनाम् उपकारकः भवति। वस्तुतः दयैव धर्मस्य मूलं वर्तते, या करुणायाः सम्पोषणं करोति। लोककल्याणाय दयालुतायाः अनिवार्यता अस्ति।

वर्तमाने अप्रत्याशितरूपेण संवर्धितायाः जनसंख्यायाः नियन्त्रणं प्रति संस्कृत-कथासाहित्यं जनान् सचेतान् करोति। अस्मिन् परिप्रेक्ष्ये संयुक्तपरिवारस्य अपेक्षया व्यक्तिगतपरिवारः अर्थात् लघुपरिवारः भाग्यशाली मन्यते। प्राकृतिकसंसाधनानां सीमितत्वात् तथा चोद्यग्यस्य अवसराणाम् अभावे अनियन्त्रितायाः जनसंख्यायाः समुचितः विकासः न भवति।

विद्यायाः (शिक्षायाः) संस्कृतवाङ्मये विशदतया विवेचना वर्तते। वस्तुतः अनया मानवस्य सर्वाङ्गीणः विकासः भवति। इयमेव तस्मै जीवनयापनस्य कलां शिक्षयति। हितोपदेशकारेण शस्त्रविद्यायाः अपेक्षया शास्त्रविद्यायै विशेषं महत्त्वं प्रदत्तम्। सः विद्याम् अनेकप्रकारकाणां लाभानां मूलरूपां मन्यते —

"विद्या ददाति विनयं, विनयाद्याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति, धनाद्धर्मं ततः सुखम्" ॥[28]

तेन पितरौ (मातापितरौ) स्वसन्ततये उत्तमशिक्षादानाय परामृष्टौ।

"मातापितृकृताऽभ्यासो गुणितामेति बालकः।
न गर्भच्युतिमाक्षेण पुत्रो भवति पण्डितः"।।[29]

"माता शत्रुः पिता वैरी येन बालो न पाठितः।
न शोभते सभामध्यये हमसमध्ये बको यथा"।।[30]

"रुपयौवनसम्पन्ना, विशालकुलसम्भवाः।
विद्याहीन न शोभन्ते, निर्गन्धा इव किंशुकाः"।।[31]

संसर्गात् अर्थात् सत्सङ्गतेः मानवे दुर्गुणानां नाशः सद्गुणानां च विकासः भवति। अस्याः महत्ताविषये भर्तृहरिणा कथितम्-

"जाड्यं धियो हरति, सिञ्चति वाचि सत्यं,
मानोन्नति दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं,
सत्सङ्गतिः कथय किं न करोति पुंसाम्"।।[32]

गङ्गातटे अवस्थितस्य पाटलिपुत्रस्य राजा सुदर्शनः स्वपुत्राणां मूर्खतया अत्यन्तमेव चिन्तितः अस्ति। अतः एकदा सः तेभ्यः शिक्षां प्रदातुं विदुषां सभां समाह्वयति, यत्रोक्तम्-

"काचः कांचनसंसर्गाद् धत्ते मारकर्ती द्युतीम्
तथा सत्सन्निधानेन मुर्खो याति प्रवीणताम्"।।[33]

पुनः ते तान् कथयन्ति यत्, अधमानां संसर्गेण मानवस्य बुद्धिः न्यूना भवति, स्वसमानबुद्धियुक्तानां संसर्गेण समाना भवति, तथा च श्रेष्ठजनानां संसर्गेण उत्कृष्टा भवति। वर्तमानस्य दूषितपरिवेशस्य स्वच्छीकरणाय स्वस्थीकरणाय च सत्सङ्गतेः अनिवार्यता वर्तते, यतो हि मानवस्य मनोदशा रुग्णतां प्रति उन्मुखा अस्ति। साधुतायाः संवर्धने अस्याः विशेषा भूमिका वर्तते। संसारे मानवेन किमपि कार्यं सम्यक् दृष्ट्वा, ज्ञात्वा, श्रुत्वा तथा च परीक्ष्य एव सम्पादनीयम्, अन्यथा सः सङ्कटानां पङ्के निमज्जति। पञ्चतन्त्रस्य 'अपरीक्षितकारकम्' इति तन्त्रे नापितेन संन्यासिनां वधविषये न्यायाधीशेन कथितम् —

"कुदृष्टं, कुपरिज्ञातं, कुश्रुतं, कुपरीक्षितम्।
तन्नरेण न कर्तव्यं नापितेनाऽत्र यत्कृतम्"।।[34]

हितोपदेशकारेण उक्ते परिप्रेक्ष्ये मन्त्रिणं प्रति राज्ञः मुखात् श्रावितम्—

"सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणुते हि विमृश्यकारिमं गुणलुब्धाः स्वयमेव संपदः"।।[35]

**निष्कर्षः** —

प्रकृतशोधलेखे वर्णिताः सन्देशाः वैश्विकसमाजस्य अभ्युदयाय सञ्जीवनीवत् कार्यं कुर्वन्ति। वैज्ञानिकोपलब्धेः मनोरञ्जनसाधनानि (चलभाषः, दूरदर्शनम्, चलचित्रम्, अन्तर्जालम्) तथा च पाश्चात्यप्रभावः जनान् कथाभ्यः विमुखान् अकुर्वन्, फलतः, तेषु संस्कार-नैतिकता-सदाचारसदृशानाम् उदात्ततत्त्वानां न्यूनता सञ्जाता। एषु सन्देशेषु कतिपयानां वैश्विकसमस्यानाम् — आतङ्कः, अपहरणम्, लुण्ठनम् (लूट्), हिंसा, भ्रष्टाचारः, पर्यावरणप्रदूषणं चौर्यश्चेत्येतादृशसमस्यासमाधानाय अन्तःसूत्राणि विद्यन्ते। एतान् सन्देशान् आत्मसात्कृत्य मानवसमाजः प्रसन्नः (सुखी), शान्तः सुव्यवस्थितश्च भवितुं शक्नोति। विशेषतः विकसितभारतस्य योगदाने एषां सन्देशानाम् उपादेयता वर्तते। अतः वैश्विकपरिवेशस्य सकारात्मकतायै एते सन्देशाः आचरणीयाः सन्ति।

## Endnotes

1. हितोपदेश,मित्रलाभ,73
2. श्रीमद्भागवद्गीता 16/2
3. हितोपदेश, मित्रलाभ,65/67
4. हितोपदेश,कथामुख,26
5. हितोपदेश, मित्रलाभ,8
6. हितोपदेश,कथामुख,19
7. हितोपदेश, मित्रलाभ,68
8. मनुस्मृति,15
9. पञ्चतन्त्र,काकोलुकीयम् 103
10. हितोपदेश,काकोलुकीयम् 104
11. हितोपदेश,मित्रलाभ 26
12. हितोपदेश,मित्रलाभ 27
13. हितोपदेश,मित्रलाभ 5
14. पञ्चतन्त्रम्,अपरिक्षीतकारकम्,21
15. नीतिशतकम्,86
16. हितोपदेश,कथामुख,33

17. पञ्चतन्त्र,मित्रसम्प्राप्तिः,140
18. पञ्चतन्त्र,मित्रसम्प्राप्तिः,141/142
19. पञ्चतन्त्र,मित्रसम्प्राप्तिः,119
20. पञ्चतन्त्र,मित्रसम्प्राप्तिः,120
21. पञ्चतन्त्र,मित्रसम्प्राप्तिः,121
22. हितोपदेश,मित्रलाभ 66
23. पञ्चतन्त्र,काकोलुकीयम् 53
24. पञ्चतन्त्रम्,अपरिक्षीतकारकम् 91
25. हितोपदेश,मित्रलाभ 11
26. हितोपदेश,मित्रलाभ 16
27. हितोपदेश,मित्रलाभ 12
28. हितोपदेश,कथामुख,6
29. हितोपदेश,कथामुख,38
30. हितोपदेश,कथामुख,39
31. हितोपदेश,कथामुख,40
32. नीतिशतकम्,23
33. हितोपदेश,कथामुख,43
34. हितोपदेश,कथामुख,17
35. हितोपदेश,सन्धिः 97

## Bibliography


- गुप्त, पु. (2014). पञ्चतन्त्रम् (अपरीक्षितकारकम् एवं व्याकरणदीपिका). विद्यानिधि प्रकाशन.
- योगी,भा.(1665). पञ्चतन्त्रम्.संस्कृति संस्थान.
- पाठक, अ. (1999). नीतिशतकम्. न्यू भारतीय बुक कॉर्पोरेशन.
- रुस्तगी, उ. (n.d.). मनुस्मृति. जे. पी. पब्लिशिंग हाउस.
- शास्त्री, रा., & शास्त्री, प्र. (2003). मित्रलाभ. धर्म-नीराजन प्रकाशन.
- श्रीमद्भगवद्गीता. भक्तिवेदान्त बुक ट्रस्ट.